Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 6 | ISSN : 2582-0095

# नामार्थविचारप्रसङ्गे सर्वप्रथमं नामपदार्थः कः इति जिज्ञासा भवति

डॉ. छगन लाल महोलिया
सह आचार्य – संस्कृत, राजकीय महाविद्यालय मनोहरथाना झालावाड़।

**Article Info**
Volume 5, Issue 6
Page Number : 44-60
**Publication Issue :**
November-December-2022
**Article History**
Accepted : 01 Dec 2022
Published : 20 Dec 2022

**शोधसारांशः**– शब्दशक्तिप्रकाशिकाकारः वाचकं, लक्षक, व्यञ्जकमिति त्रिविधं प्रातिपदिकं प्रोक्तवान्। चतुष्टयी शब्दानां प्रवृत्तिर्भवति इति जातिशब्दः, गुणशब्दः, क्रियाशब्दः यदृच्छाशब्दश्चेति भाष्यवचनात्। 'गौः' इत्यत्र गोजातेर्बोधः, शुक्लः इत्यनेन गुणस्य बोधः, चलः' इत्यनेन क्रियायाः बोधः "डित्थ" इत्यादौ यदृच्छारूपबोधः । इत्यादिका विषयाः विस्तरेण मया अस्मिन् प्रकरणे विवेचिताः सन्ति।

**मुख्यशब्दाः** – नामपदार्थःजिज्ञासा वाचकम् लक्षकः व्यंजनः शब्दशक्तिः बोधःक्रिया।

नामनि निरूपणम् - नामार्थविचारप्रसङ्गे सर्वप्रथमं नामपदार्थः कः इति जिज्ञासा भवति? तत्र भगवान् यास्कः समाम्नायं नामेति प्रोवाच। वैदिकशब्दसमुदायं व्याकरणस्य प्रयोजनव्याख्यावसरे चत्वारीति गौणप्रयोजनेऽपि पदजातानि नामाख्यातोपस र्गनिपाताश्च" इति चत्वारि विभक्तानि इत्थं नामपदेन प्रातिपदिकमिति गृह्यते। नाम्नोऽर्थः नामार्थरिति। नाम्नः चत्वारः, पञ्च, षड् वा अर्थाः शास्त्रेषु स्वीक्रियन्ते तत्र प्रवृत्तिनिमित्तं, व्यक्तिः, संख्या, लिङ्गम्, कारकमिति पञ्चकं प्रातिपदिकार्थः । किञ्च शब्दस्यापि शाब्दबोधे भाषमाणत्वात् शब्दोऽपि प्रातिपदिकार्थः। तेन षोढा प्रातिपदिकार्थ इत्युच्यते। शब्दसमुदायं किन्तावत् नामेति किञ्चाख्यातमिति जिज्ञासायामाह भगवान् यास्कः- "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानी" ति। तत्र भावो नाम भावना सैवोत्पादना सैव क्रिया। यथोक्तं श्रीमता हरिणा- "धात्वर्थो भावना सैवोत्पादना सैव व क्रिया' इत्यादि। स भावः प्रधानो यत्र तदाख्यातम् । सत्वन्नाम सीदति-गच्छति (अन्वेति) लिङ्गसंख्या दिकमस्मिन्निति सत्वं द्रव्यमित्यर्थः । विशरणगत्यवसादनाद्यर्थकषदलुधातोरधिकरणेऽर्थे, औणादिकत्वनप्रत्यये कृते सत्त्व शब्दस्य निष्पन्नत्वात्। तद्यदत्र प्रधानं गुणभूता च क्रिया तानि सत्त्वप्रधानानि, तानीमानि नामानीत्यर्थः।

अयमाशयो यत्-सत्त्व-द्रव्य-संख्यालिंगानीत्येते चत्वारोऽर्था नाम्नां तेषु सत्त्वस्यैव प्राधान्यमित्यर्थः । सत्त्वं सत्ता तदेव स्वार्थेत्युच्यते। स च प्रवृतिनिमित्तम्। प्रवृत्ति निमित्तत्वञ्च, वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वम्। एवञ्च सत्त्वद्रव्यसंख्यालिंगानीति चत्वारोऽर्था नाम्नः इति यास्काभिमतम्। यथा सास्नादि, मत्वं गोशब्दस्य तदेव गवि गोत्वम् एवञ्च सत्व-द्रव्य-संख्या-लिङ्गानीति । जगदीशतर्कालङ्कारस्तु नाम लक्षयति -

येन स्वीययदर्थस्य मुख्यतः प्रतिपादने।
स्वोत्तरप्रथमापेक्ष्या तन्नाम स्यात्तदर्थकम्।।[1] इति।

यादृशशब्देन स्वोपस्थाप्ययदर्थमुख्यविशेष्यकान्वयबोधार्थ स्वोत्तरप्रथमावि भक्तिरपेक्ष्यते तादृशः शब्द एव तदर्थकं नाम। घटादयो हि शब्दाः प्रथमान्तत्वेन निश्चिता एव स्वार्थमुख्यविशेष्यकं बोधमुत्पादपयन्ति नत्वन्यथा, न हि घट इत्यादित इव घटादित्यादितोऽपि घटादिमुख्यकः सुबर्थसंख्यादेरवगमः। पीतपटः इत्यादिकः समासोऽपि स्वोत्तरं प्रथमाप्रतिसन्धानदशायामेव पटादिमुख्यधर्मिकस्य

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पीताद्यन्वयबोधस्य जनकः, अत एव "नापदं प्रयुञ्जीतेति" वृद्धाः। पदं विभक्त्यन्तम् । पीतपटरूपमित्यादावपि नावान्तरवाक्यार्थबोधपूर्वको महावाक्यार्थ बोधः, पटादिनाम्नः प्रथमान्तत्वाभावेन तदर्थे पीताद्यन्वयधियः पूर्वमसम्भवात् विशिष्टवैशिष्ट्यावगाहितायाः प्रमाणान्तरेण पटधर्मिकपीतनिश्चयादपि तत्र सम्भवात्। न चान्योन्यपरस्परादिनामस्वव्याप्तिः 'एभ्यः प्रथमा नाभिधीयत' इति वृद्धरमरणादिति वाच्यम्। मल्लाभ्यामन्योन्यं हन्यत इत्यादौ मल्लयोः परस्पर कर्तृक-हननकर्मत्वान्वयानुरोधेन तेषामपि प्रथमान्तत्वात्, अन्यथा सकर्मकस्य हन्तेर्भावाख्यातसाकाङ्क्षात्वानुपपत्तेरकर्मकस्यैव धातोस्तथात्वात्।

**नामविभागः निरूपणम्** - तच्च नाम चतुर्विधं रूढं लक्षकं योगरूहें यौगिकरुढञ्चेति। उक्तं च शब्दशक्तिप्रकाशिकायाम

रुढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम्।
तच्चतु , परै रूढ़यौगिकं मन्यतेऽधिकम्॥[2] इति ।

तन्नाम - रूढ – लक्षक - योगरूढ यौगिकभेदाच्चतुर्विधं स्वमतेन अन्यमतेन च रूढयौगिकमपि पञ्चममधिकमिति बोध्यमिति कारिकार्थः। किञ्चिन्नाम क्वचिदर्थे रूढमेव यथा गोप्रभृतयो गवादि "गमे?र्दाभाभ्यां नुर्धेट इच्चे" त्यादेरौणादिक प्रत्ययस्य शक्तिविरहेण यौगिकत्वायोगात्। किञ्चिल्लक्षकमेव यथा तीरादौ गङ्गादि आद्यव्युपत्या पूरवर्त्तीरे शक्तिग्रहस्याविशिष्टत्वेऽप्याजानिकप्रयोगापत्त्या तदप्रामाण्यकल्पनात् शक्तेः पूर्वपूर्वप्रयोगनियतत्वात् किञ्चिद्योगरूढमेव, यथा पङ्कजाते पद्मादौ पङ्कजादि। किञ्चिद्यौगिकमेव, यथा पाककर्तादौ पाचकादि।

रूढयौगिकमप्यधिकं नाम यथा मण्डप महारजतादि, तद्धि कदाचिदवयव वृत्त्या योगार्थमेव, कदाचिच्च समुदायशक्त्या रूढ्यर्थमेवाभिधत्त इत्यपरेषां मतम्। गौर्वाहिक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न तु ततो भिद्यते।

रूढं नामपि विविधं नैमित्तिकं पारिभाषिकमौपाधिकञ्च। तदुक्तं शब्दशक्तिप्रकाशिकायाम् -

रूढं सङ्केतवन्नाम, सैव संज्ञेति कीर्त्यते।
नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्विदा॥[3] इति।

यादृशार्थविशेषबोधने व्यवहारादिना यत्संकेतितमात्रं तन्नाम संज्ञेत्युच्यते। सा च संज्ञा नैमित्तिकी, परिभाषिकी, औपाधिकी चेति त्रिविधेति कारिकार्थः। यन्नाम यादृशार्थे सङ्केतितमेव नतु यौगिकमपि तद्रूढम्, योगरूढन्तु पङ्कजादिं न तथा। रूढनामैव च संज्ञापदेनाभिलप्यते, न तु रूढादिवत् संज्ञापि नाम्नोऽवान्तरभेदः, येन विभागव्याघातः स्यात्।

शाब्दिकास्तु चतुर्विधं नाम प्राहुः। तदुक्तं महाभाष्ये[4] चतुष्टयी शब्दानाम्प्रवृतिः जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाः। गौः शुक्लः चलः डित्थादयः क्रमश उदाहरणानि सन्ति। गोगवयादीनां गोत्वादिजात्या पश्वादीनां लाङगूल- घनादिद्रव्येण धान्यपिशुनादीनां पुण्यद्वेष्यादिगुणेन चलचपलादीनाञ्च शब्दानां कर्मणावच्छिन्नशक्तिमत्वाच्चातुर्विध्यमेव रुढानामिति। यदुक्तं दण्ड्याचार्यैरपि -

शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः ।
चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः॥ इति ।

जगदीशतर्कालङ्कारैस्तु एतज्जडमूर्खादीनामन्यशून्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तम्।

नैमित्तिकं नाम-

शब्दशक्तिप्रकाशिकाकारः स्वमतेनोक्तां नैमित्तिकी संज्ञां लक्षयति -

जात्यवच्छिन्नसङ्कतवती नैमित्तिकी मता।
जातिमात्रे हि सङ्केताद्व्यक्तर्भानं सुदुष्करम॥[5] इति।

तत्र जातिविशिष्टव्यक्तौ गृहीतसङ्केता संज्ञानैमित्तिकीत्यर्थः। मीमांसकमतानुसरणेन जातिमात्रे यदि संज्ञायाः सङ्केतो गृह्यते तदा व्यक्तिमानं संज्ञया न स्यादिति परार्धार्थो बोध्यः। यन्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा। यथा गो चैत्रादिः। सा हि

गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रम्। गोपदं गोत्वे सङ्केतितामत्याकारकग्रहाद्गामानयेत्यादौ गोत्वादिनां गवादेरन्वयानुभवानुपपत्तेरेकशक्तत्वग्रहस्यान्यानुभावकत्वेऽतिप्रसङ्गात्।

भाट्टानां मतम् -

वाक्यार्थप्रतिपत्त्यनुकूलपदार्थस्मरणजनकपदपदार्थयोस्सम्बन्धः तावत् वाचकत्वं नाम सकलवादिसिद्धम्। तच्च सङ्केतो वा पदार्थान्तरं वा इत्यन्यदेतत्। स च सम्बन्धः कुत्र कल्प्यतां जातिमात्रे वा जातिव्यक्त्योर्वेति विमर्श जायमानेऽपि जातावेव तत्कल्पना ज्यायसी "नागृहीतविशेषण" न्यायेन न तु व्यक्ती अन्ताभिर्व्यक्तिभिः सह सम्बन्धग्रहस्याशक्यत्वात् सामान्यलक्षणायाः प्रत्यापत्तेः प्रमाणाभावेनानङ्गीकारात् तथात्वे तु व्यक्तेरन्यथालाभसम्भवेन तत्र शक्तिकल्पनस्य गौरवपराहतत्वात् अत एवोक्तं "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति। व्यक्तेः कथं लाभ इति चे? कर्मत्वं गवीयं गोत्वनिष्ठकर्मतात्वा दित्यनुमानरूपाक्षेपेणैव तल्लाभसम्भवात्। ननु व्यक्तिं विना किमनुपपन्नं न तावज्जातिः। न च जातिव्यक्त्योर्युगपत् प्रतीतिदर्शनात् कथमाक्षेप्याक्षेपकभाव इति वाच्यम्। गौरवप्रसङ्गबाधकबलेन युगपत्प्रतीतेर्धान्तत्वकल्पनस्यौचितत्वात्।

तस्माज्जातावेव शक्तिरिति। शब्दशक्तिप्रकाशिकाकाराः भाट्टापादादीनां मतमुपस्थापयन्तः तत्रारुचिं प्रादर्शयन्। ननु गामानयेत्यादौ गोत्वादिकर्मता कत्वेनैवानयनादेरन्वयर्धार्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतु त्वात्। ननु गोत्वादावानयनकर्मत्वाभावात् कथं कर्मत्वे गोत्यादेराधेयतयाऽन्वयबोधो योग्यताविरहादित्यत्र कथयति ग्रन्थकार: सुबर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्मताकत्वेन बोधस्तूत्तरकालमाक्षेपात्। कर्मत्वं गवीयं गोत्वनिष्ठकर्मतात्वात्, आनयनं गोवृत्तिकर्मताकं गोत्ववृत्ति कर्मताकत्वादित्याद्यनुमानसाम्राज्यात्। न च वस्तुगत्या यद्गोत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तिमित्येवं गोपदज्ञानादपि शुद्धगोत्वस्यान्वयबोधापत्तिः गोत्वत्वाद्यवच्छिन्नशक्तत्वप्रकारकज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नश क्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वत्वाद्यप्रवेशादिति वाच्यम्। गोपदं गोत्वशक्तमित्यकारकज्ञानत्वेनैव हेतुतायां शुद्धस्यैव गोत्वस्य विषयितासम्बन्धेन शक्त्यंशे विशेषणत्वेन गोत्वत्वादिप्रवेशगौरवस्यासम्भवात्। न हि समवायान्यसम्बन्धेन जातेः प्रकारतायां धर्मावच्छिन्नत्वनियमो मानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारके तस्य ज्ञाततालिङ्ग कानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात्। एतेन जातेर्निरवाच्छिन्नप्रकारत्वस्य समवायसंसर्गावच्छिन्नत्वनियमात्, केवलस्य गोत्वादेः शक्त्यंशे विषयतया सुबर्थकर्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम्। उक्तस्थल एव व्यभिचारात्। न चैवं 'कालो गौः पदं गौ' रित्यादिप्रत्यययोऽपिप्रमास्यात्, कालिकादिसम्बन्धेन गोत्वादिमति कालिकादिसम्बन्धेन तत्प्रकारकत्वादिति वाच्यम्। कालाकादिसम्बन्धेन गोत्वादेः प्रामाण्यस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वायोगात्, अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगो घट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुर्वारतापत्तेः, शाब्दस्येव प्रत्यक्षस्यापि कालो गौरित्यादिबोधस्य नियमतो गवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्तिनः ।

मण्डनाचार्यास्तु- गौर्जायते गौर्नश्यति इत्यादौ सर्वत्र गोत्वादिजातिशक्ते व गवादिपदेन लक्षणया गोत्गदिविशिष्टा व्यक्तिर्बोध्यते, व्यक्तीनां बहुत्वेनान्यलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्यानुपतत्तेरपि लक्षणायां बीजत्वात्। तदाहुः -

जातेरस्तित्वमास्तित्वे न हि कश्चिद्विवक्षति।
नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे॥ इति।

परमेतदपि नैयायिकेभ्यो न रोचते व्यक्तिं विना कृतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोगाभावेन तन्मात्रस्याशक्यत्वे तद्वति गवादी लक्षणाया वक्तुमशक्यत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात्। वस्तुतस्तु शुद्धस्य गोत्वादेः शाब्दबोधप्रकारतायाः समवायावच्छिन्नत्वनियमात् तस्यावधित्वादौ स्वावच्छेद्यत्वादिसम्बन्धेनान्वयो दुर्घट एव द्रव्यं घट इत्यादिप्रतीतेः। समवायेन प्रमात्वानुरोधाद्धटत्वादिजाते नात्वोपगमात् इति।

शक्त्यंशे विशेषणत्वेन गोत्वत्वादिप्रवेशगौरवस्यासम्भवात्। न हि समवायान्यसम्बन्धेन जातेः प्रकारतायां धर्मावच्छिन्नत्वनियमो मानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारके तस्य ज्ञाततालिङ्ग कानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात्। एतेन जातेर्निरवाच्छिन्नप्रकारत्वस्य समवायसंसर्गावच्छिन्नत्वनियमात्, केवलस्य गोत्वादेः शक्त्यंशे विषयतया सुबर्थकर्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम्। उक्तस्थल एव व्यभिचारात्। न चैवं 'कालो गौः पदं गौ' रित्यादिप्रत्यययोऽपिप्रमास्यात्, कालिकादिसम्बन्धेन गोत्वादिमति कालिकादिसम्बन्धेन तत्प्रकारकत्वादिति वाच्यम्। कालाकादिसम्बन्धेन गोत्वादेः प्रामाण्यस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वायोगात्, अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगो घट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुरितापत्तेः, शाब्दस्येव प्रत्यक्षस्यापि कालो गौरित्यादिबोधस्य नियमतो गवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्तिनः।

मण्डनाचार्यास्तु- गौर्जायते गौर्नश्यति इत्यादौ सर्वत्र गोत्वादिजातिशक्ते व गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते, व्यक्तीनां बहुत्वेनान्यलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्यानुपतत्तेरपि लक्षणायां बीजत्वात्। तदाहुः-

जातेरस्तित्वमास्तित्वे न हि कश्चिद्विवक्षति।<br>
नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे॥ इति।

परमेतदपि नैयायिकेभ्यो न रोचते व्यक्तिं विना कृतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोगाभावेन तन्मात्रस्याशक्यत्वे तद्वति गवादी लक्षणाया वक्तुमशक्यत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात्। वस्तुतस्तु शुद्धस्य गोत्वादेः शाब्दबोधप्रकारतायाः समवायावच्छिन्नत्वनियमात् तस्यावधित्वादौ स्वावच्छेद्यत्वादिसम्बन्धेनान्वयो दुर्घट एव द्रव्यं घट इत्यादिप्रतीतेः। समवायेन प्रमात्वानुरोधाद्धटत्वादिजाते नात्वोपगमात् इति।

पारिभाषिकं नाम

उभयावृत्तिधर्मावच्छिन्नसकेतवती संज्ञा पारिभाषिकी, यथाऽऽकाशस्त्यादि, सा हि द्वितयावृत्तिधर्मेणैव शब्दादिना रूपेण तदाश्रयमभिधत्तं तदुक्तं शब्दशक्तिप्रकाशिकायाम् उभयावृतिधर्मण संज्ञा स्यात् पारिभाषिकी ॥ इति ।

न चाकाशादिपदस्य गगनादौ निरवच्छिन्नैव शक्तिः, पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः। पटे शक्तमपि पटपदं न पटत्वावच्छिन्नशक्तिमदित्यादि ग्रहोत्तरं ततः पटत्वविशिष्टस्याननुभवादवश्यं तच्छक्तिरवच्छिन्नति चेत्। शब्दवति शक्यमप्याकाशपदं न शब्दवत्वावच्छिन्न शक्तिमदित्येवं ग्रहदशायामाकाशादिपदान शब्दवत्त्वेन गगनस्य प्रतीतिरितरतस्यापि शब्दवत्वावच्छिन्नैव तत्र शक्तिरिति विभाव्यताम् । एतेन पटाधुपलक्षिते धर्मिण्येव शक्तिग्रहस्य तादूप्येण पटाद्यनुभवं प्रति हेतुत्वान्मास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः , परन्तु पटत्वाद्युपलक्षितव्यक्तिष्वेव इति शिरोमण्युक्तमपि प्रयुक्तम्।

"शब्दोपलक्षितधर्मिणि शक्तिग्रहादेवाकाशादिपदात् तदंशे निर्विकल्प कात्मकस्मरणमन्वयानुभावश्चौपद्यते इति तु नानुभविकम् न वा यौक्तिकम्।

औपाधिकं नाम-

या चानुगतोपाधवच्छिन्ने सङ्केतवती संज्ञा सा त्वौपाधिकी यथा मृतदूतादिः, सा हि सचेतनवृत्तिविशेषगुणवत्त्ववार्ताहारकत्वाद्यनुगतोपादिरपि नानु गतो द्वितयावृत्तित्वादतः पारिभाषिके गगनादिपदेनातिप्रसङ्गः। घटत्वादिजातेः संस्थानवृत्तित्वमते यदि घटादिपदं विलक्षणसंस्थानवत्त्वेन शक्तं तदौपाधिकमेव, यदि च परम्परया वैलक्षण्यवत्वेन तदा नैमित्तिकमेव। वस्तुतः समान्यबुद्धौ स्वरूपतः प्रकारत्वं समवायनैवेत्यभिहितं पूर्वम् । अथवा यत्रार्थे यन्नाम आधुनिकसंकेतवत् तदेव तत्पारिभाषिकम् यथा पित्रादिभिः पुत्रादौ संकेतितं चैत्रादि, यथा वा शास्त्रकृभिः सिद्धभावादी पक्षतादिः। जात्यवच्छिन्नशक्तिमन्नाम

नैमितिकम् यथा गो गवयादि। यदुपाध्यवच्छिन्नशक्तिमन्नाम तदीपाधिकम् यथा आकाशपश्वादि। आधुनिकास्तु सङकेतो न शक्तिनित्यस्यैव तस्य तथात्वात्। तदुक्तं भर्तृहरिणा-

आजानिकश्चाधुनिकः सङ्केतो द्विविधो मतः।
नित्य आजानिकस्तत्र या शक्तिरिति गीयते।।[6] इति।

न च पित्रादिना सङ्केतिते चैत्रादिपदे नित्यसङ्के तत्त्वे मानमस्ति, द्वादशेऽहनि पिता नाम, कुर्यादिति श्रुतेः पितृकर्तव्यसङ्केतविधायकमात्रपरत्वात, चैत्रादिपदस्य शक्तिमत्वे पूर्वपूर्वप्रयुक्तत्वापाताच्च,तस्य तन्नियत्वादित्युक्तत्वात्। चैत्रादिपदानामिव पारसीकादिशब्दानां सङ्केवत्त्वाविशेषेऽपि न तेषां धर्मकर्मण्युपयोगः "साधुभिर्भाषितव्यं नापभ्रंशितवै न म्लेच्छितवै" इति श्रुत्या तत्र तन्निषेधात्। म्लेच्छितवै म्लेच्छमात्रसङ्केतितैः। स्वरादिशब्दास्तु रासभादौ म्लेच्छरिवाप्तैरपि सडकेतिताः।

लक्षकं नाम -

यादृशनामार्थसम्बन्धवति यन्नाम संकेतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेत्। सैन्धवादयस्तु शब्दास्तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङकेतितास्तत्सम्बन्धि नीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्तीति तत्र ते लक्षका एव। तदुक्तं शब्दशक्तिप्रकाशिकायाम् -

यादृशार्थस्य सम्बन्धवति शक्तन्तु यदभवेत्।
तल्लक्षकं नाम तच्छक्ति विधुरं यदि।।[7] इति।

तथा च यादृशानुपूर्व्यवच्छिन्नं नाम यादृशार्थनिरूपितशक्तशून्यत्वे सति यादृशार्थसम्बन्धवन्निरूपितशक्तमत् तादृशानुपूर्व्यवच्छिन्नं तन्नाम तादृशार्थे लक्षकम्।

कथञ्चित्तीरादिसम्बन्धित्वेन गृहीतादपि गङ्गादिपदात्तीरादेरन्वयाबोधेन तीराद्यशक्तत्वे सति तत्वसम्बन्धितामात्रन्तु न लक्षणा, "गङ्गागङ्गायां घोष" इत्यादावपि गङ्गागऐति भागस्य निरुक्तलक्षणायाः सत्वेन वैयर्थ्याभा
वप्रसङ्गाच्च। एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वे तीरादिपरत्वं तीरादिस म्बन्धयनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रयुक्तम् अपभ्रशंस्यापि लक्षकत्वापाताच्च । न चेष्टापत्तिः, शक्तिलक्षणान्यतरवृत्तिमत्वे तस्य साधुत्वापत्तेः, पदसाधुतायां वृत्तिमत्वस्यैव तन्त्रत्वात्। किञ्चानुभावकत्वं यद्यनुभवस्योपाधायकत्वं तदा घोषादिपदसाकङ्क्षस्य गङ्गादिपदस्य तीरलक्षता न स्यात, तेन तीरसम्बन्धिनो नीरस्यानुभवनर्जनात्, स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्वार, तस्याप्याधेयताधार्मिकनीरानुभवं प्रति नीरार्थकनामोत्तरसप्तमीत्वेन तथात्वात्, नीराधेयत्वस्य च तीरसम्बन्धित्वानपायात्। लक्षकं नामानेकविधम्। तदुक्तं शब्दशक्तिप्रकाशिकायाम् -

जहत्स्वार्थाजहत्स्वार्थानिरूढाधुनिकादिकाः।
लक्षणा विविधास्ताभिर्लक्षकः स्यादनेकधा।।[8] इति।

काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते, यथातौर त्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वादजहत्स्वार्था, यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य। काचिल्लक्ष्यतावच्छेदकीभूततद्रूपेण पूर्वं पूर्व प्रत्यायकत्वान्निरुढा, यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरूणादिपदस्य। काचिच्च पूर्व पूर्व ताद्रूप्येणाप्रत्यायकत्वादाधुनिकी, यथा घटत्वादिना पटादिपदस्य। आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौण्युपगृह्यते, यथा अग्निर्माणवक इत्यादा वग्निसदृशत्वादिना अग्न्यादिपदस्य। तदेवं विविधलक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थाऽजहत्स्वार्थादिभेदादनेकविधमित्यर्थः ।

योगरूढम् -

यन्नाम स्वावयवृत्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकृतं तन्नाम योगरुढम् यथा-पङ्कजकृष्णसाधर्मादि, तद्धि स्वान्तर्निविष्टानां पङ्कादि शब्दानां वृत्तिलम्येन पङ्कजनिक दिना समं स्वशक्यस्य पद्मादेरन्वयानुभावकं पङ्कजमित्यादितः पङ्कजनिकर्तृपद्ममित्यनुभवस्य सर्वसिद्धत्वात्। तदुक्तं शब्दशक्तिप्रकाशिकायाम् -

स्वान्तर्निविष्टशब्दार्थस्वार्थयोर्बोधकृन्मिथः ।
योगरूढं न यत्रैकं विनाऽन्यस्यास्ति शाब्दधीः॥[9] इति।

लक्षणासङ्गतिस्त्वित्थम्-स्वं-लक्षकत्वेनाभिमतं स्वान्तर्निविष्टाः स्वघटका ये शब्दास्तेषामर्थः स्वशक्यार्थयोः परस्परं निरूप्यनिरूपकभावापन्न विषयताशालि बोधजनकं नाम योगरूढमिति कारिकार्थः। अत्रैतावान् विशेषः यद्रूढमपि मण्डपरथकारादिपदं योगार्थ विना कृतस्य रूढ्यर्थस्येव रूढ्यर्थ विना कृतस्यापि योगार्थस्य बोधकम्, मण्डपे शेते इत्यादौ योगार्थस्य मण्डपानक देरिव, 'मण्डपं योजयेत्, इत्यादौ समुदितार्थस्य गृहादेरयोग्यत्वेनान्वयाबोधात्। योगरुढन्तु पङ्कजादिपदमवयववृत्त्या रूढ्यर्थमेव समुदायशक्त्या चावयवलभ्यार्थमेवानुभा वयति, न त्वन्यत् व्युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात्। अत एव 'पङ्कजं कुमुदमित्यत्र पङ्कजनिकर्तृत्वेन भूमौ पङ्कजमुत्पन्नमित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कुमुदस्थलपद्मयोर्बोध इति वार्तिकम्।

मीमांसकास्तु- मीमांसकानामिष्टत्वात् ते हि 'मण्डपं भोजये' त्यादावपि गृहादौ रूढिधीसत्वे मण्डपादिपदानामवयवशक्त्या मण्डपानकार्त्रादेर्न मन्वते बोधम्, भ्रमत्वग्रहा नास्कन्दितस्येव रूढ्यर्थगोचरतत्तदयोग्यताज्ञानाद्यभाव विशिष्टस्यैव रूढिज्ञानस्य विरोधितायाः सुवचत्वाच्च। यदि च समुदाय एव पङ्कजनिकर्तृत्वेन पद्मत्वेन च शक्तेः प्रमाभ्रमाभ्यां 'पङ्कजातं पद्म' मित्याकारको बोधः प्रामाणिकः, तदानीं च पङ्कजनिकर्तृत्वेन कुमुदस्य नान्वयधीः, तदावयवशक्त्येत्यपहाय पङ्कजपदघटकशब्दशक्त्येति प्रतिबध्यकुक्षौ निक्षेपणीयम्। तदघटकत्वञ्चेह तद्विषयिताकत्वमात्रं तदवयव इव तत्राप्यविशिष्टम् ।

किञ्च-स्वावयवशक्त्या पङ्कजपदजन्यं पङ्कजकर्तृत्वेनान्वयबोधं प्रति पद्मत्वं हेतुः तत्र कार्य्यस्य विशेष्यत्वं तदवच्छेदकत्वं वा कारणस्य तु समवायस्तादात्म्यं वा प्रत्यासत्तिरित्येतावतैव योगार्थमर्यादया कुमुदादेर्बोधव्युदा ससम्भवात् उक्तक्रमेण प्रतिबन्धकतायां मानाभावः, 'पद्मत्वं पङ्कजपदप्रयोगोपाधिरि ति प्राचीनप्रवादस्याप्युक्तार्थ एव पर्यवसानात् इति।

यद्यपि पङ्कजननकर्तृषु पङ्कजादि पदानां शक्तिसत्वेऽपि पङ्कजपदान्न ताद्रूप्येण पद्मस्य बोधः परन्तु पद्मत्वमात्रेण, योगार्थमर्यादया पङ्कजातत्वप्रकारकबोधसामान्यं प्रत्येव पद्मत्वविशिष्टे रूढिज्ञानस्य लाघवेन विरोधित्वात् पद्मान्यधर्मिकत्वादेर्गौरवेण प्रतिबध्यकोट्यप्रविष्टत्वादतो योगरूढं नामैव नास्ति, युधिष्ठिरादिशब्दादपि रणस्थिरत्वादिकं योगार्थ परित्यज्यैव वैजात्या दिप्रकारेण कुन्तीपुत्राद्यवगमात्, यदुक्तमभियुक्तैः-

या वृत्तिरजहत्स्वार्था सेयमत्रोपपादिता।
जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी॥
पङ्कजं मनसादेवी पद्मनाभो युधिष्ठिरः॥[10] इति।

एतद्वैयाकरणमतं पङ्कजमस्तीत्यादितः पङ्कजातं पद्ममस्तीत्याद्यनुभवस्य न्यायमीमांसादिसकलतन्त्रसिद्धत्वेन गौरवस्य प्रामाणिकत्वादनादेयम्, अन्यथा अवयवशक्तेरपि प्रतिबध्यतायामप्रवेशापत्तेर्लाघवेन पङ्कजातत्वप्रकारकशाब्दसा मान्यं प्रत्येव रूढिधियः प्रतिबन्धकत्वस्य सुवचत्वात्। योगरूढं सामासिकं तद्धितान्तमिति द्विविधम्। कृदन्तस्य सामासिक एवान्तर्भावः। तदुक्तं शब्दशक्तिप्रकाशिकायाम् -

सामासिकं तद्धितान्तमिति तद्विविधम्भवेत्।
योगरूढं कृदन्तस्य समासत्वव्यवस्थितेः॥[11] इति।

सामासिकं-कृष्णसर्पादि तद्धितान्तं वासुदेवादि। कृदन्तस्य पङ्कजादि योगरूढस्य सामासिक एवान्तर्भाव इति नाधिक्यम्।

**न्यायाभिमतनामार्थ विचारः -** नैयायिकानां मते पदानां शक्तिसङ्केत: न तु पदार्थानन्तरम्, स च व्यवहारवलेनैव जातिमद् व्यक्तावपि गृह्यते न हि गोपदात् जातिमात्रं गृह्यते। न च व्यक्तिरिति युक्तिमत् तस्मात् सङ्केतग्राहकस्य जातिव्यक्तिसाधारणस्य प्रमाणसिद्धत्वात् उभयत्रापि सङ्केतरूपा शक्तिरिति न काऽपि अनुपपत्तिः। तथाहि 'गामानये' ति वाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्यगवानयने प्रवृत्तिमवलोक्य सा च गवानय- नज्ञानसाध्या तच्च ज्ञानं 'गामानये' ति वाक्यजन्यम् वाक्यजे ज्ञाने पदोपस्थापित एवार्थो अन्वयप्रतियोगितया भाषते इति सिद्धान्तात् तथा च गोपदात् गोव्यक्तिरनुपस्थितौ आक्षेपात् व्यक्तेरबोधादपि आक्षिप्तपदार्थस्य शाब्दबोधे भानाभावात् न व्यक्तेः बोधः सम्भवति अतो 'गामानये' त्यादिवाक्यात् गोव्यक्तिः बोधात् व्यक्तावपि गोपदशक्ति स्वीकार्या।

न च जाति प्रत्ययान्तरं व्यक्तिप्रतीतिस्तत्र, येन विशिष्टे शक्तिग्रहः स्याद्विशेषणज्ञानस्य विशिष्टज्ञानात्पूर्व नियमेन सत्वस्यावश्यकत्वात् किन्तु युगपदेव । न च तदुपपादकं युगपवृत्तिद्वयं सम्भवति। क्वचिन्मुख्यं हि क्वचिल्लाक्षिकं भवति, न च जातौ क्वचिन्मुख्यः प्रयोगो व्यक्तिमनादाय क्वचिदपि पदाज्जा तेर्व्यवहाराभावात्तथा च गोबोधार्थ तत्रापि शक्तिरावश्यकी। एवं जातौ निर्विकल्पकोपस्थितायां न शक्तिग्रहः किन्तु सविकल्पकोपस्थितायां, जातौ विशेषणं व्यक्तिरेव तथा च जातेः स्मरणमपि सविकल्पकतया विशेषणसापेक्षम् विशेषणं च व्यक्तिरेवेति समानसंवित्संवेद्यतया, कथमाक्षेपः। न चान्वयप्रकारतयापि व्यक्तेर्ज्ञानं किन्तु प्राधान्येन। किं च प्रकारोपस्थितावन्यप्रकारता स्यात् व्यक्त्या विना जात्युपस्थितिरेव नास्तीति कस्यान्वये व्यक्तिः प्रकार: स्यात्। तस्मात् पदशक्तेः कार्यापेक्षतयोभयविषयकज्ञानस्यैव कार्यस्यानुभवसिद्धत्वादुभयत्रैकैव शक्तिः । शब्दशक्तिप्रकाशिकाकारास्तु अत्रैवं ब्रुवन्ति -

शाब्दमते गवादिव्यक्त्याववाहितत्वमवश्यङ्कारणप्रयोज्यं जन्यधीविषयि तायास्तत्प्रयोज्यत्वनियमादन्यथा पक्षिधर्मिकसाध्याद्यवहितादरपि परामर्शादिप्रयोज्यता न स्यादनुमितिसामान्यं प्रत्येवं ज्ञानत्वादिना हेतुत्वस्य लाघवेनौचित्यात्, पक्षतादिसहकृतपरामर्शाद्युत्तरज्ञानस्य तत्प्रकाशस्यैव वा पक्षे साध्यावगाहित्व नियमादेवानुमित्यादेः प्रतिनियतपक्षाद्यवगाहित्वसिद्धेः। किञ्च गोत्वशक्तत्वं न गोत्वसमर्थत्वं यस्य धीरन्वयधीहेतुरप्रसिद्धत्वात्। नापि तद्गोचरमभिधानामकं पदार्थान्तरं, तत्र मानाभावात्। न वा गोत्वानुभवजनकत्वं, पटादिपदस्यापि गोत्वशक्तत्वापत्तेस्तस्यापि गवादिपदाकाङ्क्षादिसाचिव्येन गोत्वानुभवजनकत्वात्। न च गोत्वानुभवसामान्यं प्रति हेतुत्वं तथा, गवादिपदेऽप्यसत्त्वात्। नापि गोत्वानुभवजनकत्वप्रकारकनित्यसङ्केतवत्त्वं तादृशसङ्केतवत्त्वमात्रं वा गोत्वशक्त त्वमिति साम्प्रतम्। गोपदं गोत्वेन गवानुभवस्य जनकतया न सङ्केति तमित्यादिग्रहेऽपि तस्य ग्रहाद्गोत्वेन गोरन्वयधीप्रसङ्गात्, किन्तु गोत्वेन गवानुभवस्य जनकतया सङ्केतित्वं तथा, तथा च पदधर्मिकतज्ज्ञानत्वेन गोत्वप्रकारकशाब्दं प्रति हेतुतायां गोत्वस्येव तद्विशिष्टस्य गोरपि विषयविधया ऽवच्छेदकत्वादवश्यं गोत्वादिविशिष्टो गवादिर्गवादिपदस्यार्थः ।

**वैयाकरणाभिमतनामार्थ विचारः**

नामार्थविचारस्यैवाभिप्रेत्य वैयाकरणा अपि ब्रुवन्ति

एक द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा।

नामार्थ इति सर्वेऽमी पक्षा शास्त्रे निरूपिताः॥[12] इति।

नामपदेन प्रातिपदिकमुच्यते। तस्यार्थः नामार्थः इति भवति। कति नामार्थाः सन्ति इति जिज्ञासायां कौण्डभट्टेनेयं कारिकोपस्थापिता। एकं जातिः लाघवेन तस्या एव वाच्यत्वस्यौचित्यात्। अनेकव्यक्तीनां वाच्यत्वे गौरवात् । जातिपदेनात्र तत्तत्पदार्थगतासाधारणो धर्मो विवक्षितः, न तु नित्यत्वे सत्येकत्वे च सत्यनेक समवेतत्वरुपा जातिः। असाधारणत्वं च तत्पदार्थेतरावृत्तित्वे सति तत्पदार्थवृत्तित्वम्।

नागेशा मीमांसकोक्तं मतं खण्डयन्तः प्राहु:- गोत्वमस्तीत्यर्थे अन्वयानुपपत्त्याभावेन गौरस्तीतिप्रयोगे व्यक्तिभानानापत्तेः व्यक्तीभानानापत्तेः व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजातेरूपलक्षणत्वेन तदैक्येन च तादृश जात्युपलक्षितव्यक्ती शक्तिस्वीकारेणानन्तशक्तिकल्पनाविरहेणागौरवम्। अस्यायमाशयः-धर्ममुलक्षणीकृत्य शक्तिग्रहात् वस्तुतस्तद्धर्माकृतिविशिष्टा व्यक्तिर्बुध्यते न तु तद्धर्मप्रकारेण। एतदेव जात्यादेपलक्षणत्वं यत्स्वाश्रयणां सर्वेषां स्वरूपतः शक्तिग्रहविषयत्वं सम्पाद्य स्वयं शक्तिग्रहाविषयो

बोधाविषयश्च । यथा 'काकवन्तो देवदत्तस्य गृहा' इत्यत्र काकः स्वोपलक्षिततृणत्वादिना तद्गृहम् इतरेभ्यो व्यावर्त्तयति । तथा जातिर्व्यक्तीरूपस्थाप्य स्वोपलक्षिताभिर्व्यक्तिभिः शक्तिमितरेभ्यो व्यावर्तयति। एवञ्च शक्यव्यक्तीना मानन्त्येऽपि उपलक्षणीभूतघटकत्वादिजातेरैक्याच्छक्तेरैक्यं कारणताया निरूपकाश्र यव्यक्ति बाहुल्येऽप्यवच्छेदक-दण्डत्वादेरैक्यादैक्यवत्। शक्यतावच्छेदकभेद एव शक्तेर्भेद इति नास्ति अनन्तशक्ति कल्पनगौरवम्। लक्ष्यतावच्छेदकतीरत्वादिवत् शक्यतावच्छेदकस्यावाच्यत्वे दोषाभावात्। "नागृहीत" इति न्यायस्य विशेषण विशिष्टविशेष्यबोधे तात्पर्येऽपि मानाभावात्। जाते उपलक्षकत्वेन तदाश्रयस कलव्यक्ति बोधेनव्यक्त्यन्तरबोधाप्रसङ्गभङ्गाच्च। तदाह -

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्द: सुकर सम्बन्धो न च व्यभिचरिष्यति॥[13] इति।

अस्यायमर्थः भावानां व्यक्तीनामान्त्येऽपि एक जातिरूपं धर्ममुपलक्षणं कृत्वा सुकरसम्बन्धः सुकरशक्तिग्रहः शब्दः न च व्याभिचरिष्यति नासम्बद्धां व्यक्तिं बोधयिष्यति।

एक जातिरूपम्- तत्रार्थो नाम शब्दाश्रवणानन्तरं प्रतीतिपथमागतः पदार्थ एव। स एव वाच्योऽभिधेयश्चापीत्युच्यते। परमगृहीतवृत्तिकस्य शब्दस्य श्रवणानन्तरमप्यर्थप्र तीतेरभावान्न केवलं शब्दस्यैवार्थबोधे कारणत्वमपितु वृत्तिविशिष्टज्ञानस्यपि तत्कल्प्यते। यथोक्तं मञ्जूषायां "अगृहीतवृत्तिकस्य शाब्दबोधादर्शनात्, "न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते" इति समर्थसूत्रभाष्याच्च तद्धर्मावच्छिन्नविषयक शाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः इति नागोजिभट्टैः। सा च वृत्तिस्त्रिधा, शक्तिर्लक्षणा व्यञ्जना च। अयमाशयोः- यन्न सर्वैः शब्दैः सर्वेषामर्थानां प्रतीतिर्भवति, अपितु केनाऽपि कस्यचिदेवार्थस्येति, अस्ति कश्चित्, शब्दार्थयोः परस्परं सम्बन्धः स एव शक्तिरित्युच्यते। सेयं शक्तिः केति जिज्ञासायाम् "इदं पदमिममर्थ बोधयतु, अस्मात्पदादयमर्थो बोद्धव्यः' इत्याकारा, ईश्वरेच्छैवेति नैयायिका वदन्ति। किन्तु वैयाकरणा इच्छायाः संबन्धत्वाभावात् वाच्यवाचकभावापरपर्यायं पदपदार्थयोः संबन्धान्तरमेव शक्तिरित्यामनन्ति। सङ्केतस्तु तद्ग्राहकमितरेतराध्यासमूलं तादात्म्यमिति स्पष्टं मञ्जूषादौ। एवञ्च यस्य शब्दस्य यस्मिन्नर्थे सङ्केतः स शब्दस्तस्यार्थस्य वाचकः। अर्थश्च वाच्येति बोध्यम् । स्वीकृते चैवं यत्रैव नाम्नां सङ्केतः स एव नामार्थ इति सिद्ध्यति। स च कवलं जातावेवेति सैव नामार्थ इति, एकं नामार्थः इति प्रथम: पक्षः । पक्षस्यास्यायमाशयो यद व्यक्तीनामनेकत्त्वाज्जातेश्चैकत्वात्तत्रैव शक्तिस्वीकारो युक्ती लाघवात्। इति तस्या एव वाच्यत्वौचित्यात, सैव नामार्थः। न च नित्यत्वे सति, अनेकसमवेतत्त्वरूपजातित्वस्याभावत्वाकाशत्वादिष्वभावादव्याप्तिरिति वाच्यम् । तत्तत्पदार्थासाधारणधर्मस्यैवात्र जगति पदार्थाङ्गीकारात्। तस्यैव शास्त्रे स्वार्थपदेन व्यवहारः। पक्षे चास्मिन् "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" इतिसूत्रे "सवर्णेऽणग्रहणमपरिभाष्यमाकृतिग्रहणात् सिद्धम्" इति वार्तिकस्याप्यत्र मानत्वात्। ननु प्रतिव्यक्तेरप्येकत्वाद् विनिगमनाविरहेण, तत्रापि शक्तिस्वीकारे गौरवाभावात् सैव नामार्थ इत्युच्यते चेन्न, व्यक्तौ शक्तिस्वीकारे व्यक्त्यन्तरप्रतीतये लक्षणाया अवश्यमङ्गीकरणीयतया संसर्गस्य स्वसमवेताश्रयत्वेन गौरवस्य सुस्पष्टत्त्वात्। जात्या शक्तिस्वीकारे तु स्वाश्रयत्वेन तस्याः प्रतीतेर्लक्षणाया अनावश्यकतया लाघवम्। अयमाशयो यत् व्यक्तौ शक्तिश्चेत्तदा व्यक्त्यन्तर प्रतीतये, स्वपदेन व्यक्तिस्तत्समवेता जातिस्तदाऽऽश्रयाऽन्या व्यक्तिरिति समवेताश्रयसम्बन्धेन लक्षणा स्वीकरणीयेति गौरवम्। जातौ शक्तिरिति पक्षे तु स्वाश्रयत्वेनैवेति लाघवमिति मीमांसकाः। किञ्च शक्तिग्राहकशिरोमणिना व्यवहारेण व्यक्तेरेव प्रवृत्तिनि वृत्तियोग्यतया तत्रैव शक्तिग्रहस्वीकारात् एकस्यां गोव्यक्ती गृहीतशक्तिकस्यापरगोव्यक्तिबोधे व्यभिचाराः। एकव्यक्तिविषयक शक्तिज्ञानादन्य व्यक्तिविषयकबोधाङ्गीकारे तु घटव्यक्तिविषयकशक्तिज्ञानात् पटविषयकशाब्द बोधापत्त्या तद्व्यक्तिविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद् व्यक्तिविषयकश क्तिज्ञानस्यावश्यं कल्पयतया, एकव्यक्तिविषयकशक्तिज्ञानादपरव्यक्तिविषयकवोध स्यानुदयात् सकलव्यक्तिबोधाय सकलव्यक्तिषु शक्तिस्वीकारे, आनन्त्याच्च जातावेव शक्तिस्वीकारो युक्तः इति मीमांसकाः। न चैव जातिविशिष्टव्यक्ती शक्तिस्तेन न

व्यवहारासंगतिर्नाऽपि व्यभिचारो न चानन्तशक्तिकल्पनेति वाच्यम् । गौर्गोपदवाच्य इति व्यक्तिविषयकशक्तिग्रहेऽपि सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः "इति न्यायेन जातावेव शक्तिस्वीकारस्यौचित्यात्। अतः गौर्गोपदवाच्य इतिशक्तिग्रहोऽपि जातिविषयक एव बोध्यः। नागृहीत विशेषणाबुद्धिर्विशेष्यमवगाहते" इति नयस्य जागरूकत्वाद। अत एव "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इति प्रतिपादितं भट्टचरणैः। न चैवं "गौरनुबन्ध्यः" "गामानय" इत्यादिस्थले जातेरनुवन्नधानयनायोग्यतयाऽन्वय स्यैवासम्भवत्वमिति वाच्यम्। लक्षणया व्यक्तिबोधेनान्वयस्योपपन्नत्वात्। नाऽपि व्यक्तिलक्षणाङ्गीकारे "युगपदवृत्तिद्वयविरोध" इति सिद्धान्तविरोधापत्तिश्च । "गङ्गायां मीनघोषौ" इत्यत्रेव सति तात्पर्ये सर्वैरेव वृत्तिद्वयस्वीकारादिति जातिरेव नामार्थ इति एकं नामार्थ इति पक्षसारः।

वैयाकरणाः पुनरेकं नामार्थ इत्यस्य केवलं व्यक्तिरेव नामार्थ इत्याशयं वर्णयन्ति । पक्षस्यास्य "अणुदित्सवर्णस्य चाप्रत्ययः" इत्यत्र अण्ग्रहणम् "सरूपाणामेकशेष एकविभक्तौ" इत्यत्र एकशेषारम्भश्च प्रमाणम्। तथाहि-जातिविशिष्ट व्यक्ती शक्तिस्वीकर्तृमतेतत्तज्जातिप्रकारकस्तदाश्रयविशेष्यशाब्दबुद्धित्वावच्छिन्नं प्रति तत्त ज्जात्यवच्छिन्नविशेष्यताकशक्तिज्ञानस्य कारणत्वेन "अ" इत्यादिपदेनैव अत्वजा त्यवच्छिन्नसकलव्यक्तिभावसम्भवेन अणग्रहणस्य वैय-पत्तिः स्पष्टैव। केवलजातिव्यक्तिवादेऽपि जातिशक्तिज्ञानस्यैव विशिष्टबोधे कारणतया लक्षणया अविनाभावेन वा व्यक्तिबोधसम्भवे अण्ग्रहणवैयर्थ्य तदवस्थमेव। इदमत्र तात्पर्यम् यत् सवर्णानां ग्रहणायैव तत्राणग्रहणम् यदि च जातौ शक्तिः स्यात्तदा सर्वेषामपि ह्स्वदीर्घप्लुतानामणामत्वादिजात्यवछिन्नतया बोधात्तदग्रहणं व्यर्थं स्यात्।।

एवमेव जातौ शक्त्यङ्गीकारे सर्वेषामपि घटपटादीनां व्यक्तीनामेकेनैव घटपदेन पटपदेन वा बोधादनेकेषां घटादिनाम्नां प्रयोगस्यैवाप्राप्तेरेकशेषस्य व्यर्थत्वाद्। व्यक्तिरेव नामार्थ इत्येव शास्त्रसम्मतम्। व्यवहारेणापि एतदेव-सिद्ध्यति। शक्यतावच्छेदकजातेश्चैक्याच्छक्तेरप्यैक्यान्नानन्त्यदोषोऽपि। न च स्वीकृते चैवं घटत्वादेरपि शक्यतावच्छेदकतया वाच्यत्वं स्यात् तथा च "नागृहीतविशेषणन्यायेन तदेव वाच्यं भवेत्" इति वाच्यम्। अकारणत्वेऽपि कारणतावच्छेदकत्ववत्, अलक्ष्येऽपि लक्ष्यतावच्छेकत्ववदत्रापि अशक्यमत्वेऽपि शक्यतावच्छेदकत्वाङ्गीकारे बाधाभावात्। इति सुस्पष्टं भूषणसारे। एवं जातिपक्षे एकनैव शब्देन द्वयोर्बहूनां वा प्रत्यायनसम्भवात् एकशेषविधानमनर्थक सद्व्यक्तिपक्षज्ञापकम्।

किञ्च-

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्यवृद्धाः।।[14] इति ।

इत्येतेषु शक्तिग्राहकशिरोमणिर्व्यवहारो व्यवतावेव शक्तिं ग्राहयति। गवादिपदेन लोक व्यवतेरेव बोधात्।

द्विक- जातिसहिता व्यक्तिः। अर्थात् प्रवृत्तिनिमितं व्यक्तिश्चेति द्विकं प्रातिपदिकार्थः वस्तुतस्तु "ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थ" इति सरूपसूत्रभाष्याद् विशिष्टमेव वाच्यम्, तथैवानुभवात्। अनुभवसिद्धस्यापलापानर्हत्वाच्च। अत्रायं भावः आकृतिः पदार्थः पदवृत्तिज्ञानजन्यप्रतीतिविषयः, यस्य शब्दस्य तस्य आकृतिवाचक- शब्दस्य द्रव्यं नार्थ इति न किन्तु द्रव्यमप्यर्थः। विशिष्टं जातिविशिष्टं द्रव्यम्, द्रव्यविशिष्टाजातिर्वा । यद्यपि "आकृतिपदार्थस्य द्रव्यं न पदार्थो द्रव्यपदार्थकस्य चाकृतिर्न पदार्थ इत्युभयोरूभयं पदार्थः' इति भाष्याद् विशकलितयोरेवाकृतिव्यक्त्योः शक्तिग्रहविषयता लभ्यते तथापि 'कस्यचिद् किञ्चिद्गुणभूतं किञ्चित्प्रधानम्" इत्युत्तरभाष्यपर्यालोचनया तत एव विशिष्ट शक्त्यवधारणात् तथोपादानमविरूद्धम्। नागेशास्तु "प्रतिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा[15] इति सूत्रे लघुशब्देन्दु शेखरे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमितं तदाश्रयश्च। स च मुख्य इवारोपिता तदाश्रयोऽपि। अत एव "गोपी" इत्यादौ स्वादिप्रकृतेर्लाक्षणिकत्वेऽपि न दोषः । अत एव लिङ्गस्यापि प्रातिपदिकार्थतया तद्वैयर्थ्य स्पष्टमेव। अत्र विचार्यते किमिदं प्रवृत्तिनिमित्तम्? अत्रोच्यते- "वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारताविषयत्वं प्रवृत्तिनिमित्तत्वम् । तत्र वाच्यत्वे सतीत्युक्त्या शब्दाश्रयत्वस्य नाकाशपदप्रवृत्तिनिमित्तत्वं तस्याकाशशब्दवाच्यत्वाभावात्। वाच्यवृ त्तित्वे सति इत्युक्त्या-

"जात्याकृतिव्यक्तयः पदार्थः इति गौतममते अवयवसमवेतायाः संयोगात्मकावयवसन्निवेशविशेषरूपाया आकृतेर्न गवादिपदप्रवृत्तिनिमितत्त्वं वाच्यत्वेऽपि तस्या गोरूपवाच्यवृत्तित्वाभावात्। न च स्वसमवायिसमवेतत्व- सम्बन्धेनावयवृत्त्याकृतेर्गवादौ वृत्तितया स दोषस्तदवस्थ एवेति वाच्यम्, साक्षाद्वाच्यवृत्तिताया एव ग्रहणात्। निरूक्तसम्बन्धेनावयवद्वारा गोवृत्तित्वेऽपि साक्षादाकृतेर्गोवृत्तित्वाभावात्। सोऽपि सम्बन्धो वाच्य एव ग्राह्यः एवञ्च कालिकादिनाऽऽकृतेर्गवादिवृतित्वेऽपि न प्रवृत्तिनिमित्तता, तादृशपरम्परासम्बन्धस्य वाच्यत्वाभावात्। तदेवं साक्षात्त्वनिवेशोऽपि नावश्यक इति लाघवम्।

वाच्योपस्थितिप्रकारत्वनिवेशात्-आधाराधेयभावसम्बन्धेन हर्यादिपदवाच्यार ववृत्तिहर्यापदवाच्येन्द्रादौ घटादिपदवाच्ये घटादिपदवाच्य वृत्तौ च समवायसम्बन्धे न प्रवृत्तिनिमित्तत्वम्, वाच्योपस्थितिप्रकारत्वस्य समवायसम्बन्धे इन्द्रादौ चाभावात् ।

त्रिकम्- लिङ्गमपि नामार्थः—केचन पुनस्त्रिकं जातिव्यक्तिलिंगानि प्रत्ययानां द्योतकत्वात् नामार्थ इत्यामनन्ति। अन्यथा वाग् उपानद् आदिशब्देभ्य इयं तव वागिति स्त्रीत्वबोधानापत्तेः। लिंगत्वञ्च प्राकृतगुणवतां पदार्थानां धर्मविशेषः । इदमत्र तात्पर्य यत् सर्वेऽपि पदार्थाः सत्त्वरजस्तमसां परिणामभूता इति सांख्यानामभिमतम्। इति शब्दोऽपि त्रिगुणात्मकः, तत्र सत्वरजस्तमसां साम्यावस्थैव नपुंसकत्वम्, उपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्। तादृशं लिङ्गं शब्दनिष्ठं स्वाश्रयशब्दस्य वाच्यञ्चापीति त्रिकं नामार्थ इति। तदुक्तं भाष्ये-तटे सर्वलिङ्गानि दृष्ट्वा कोऽध्यवस्यति अयम्पुमान, इयं स्त्री इदन्नपुंसकमिति? तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम, अवश्यङकश्चित् स्वकृतान्तः आस्थेयः कोऽसौ स्व कृतान्तः? संस्त्यानप्रसवौ लिङ्गमास्थयौ। किमिदं संस्त्यानप्रसवौ? संस्त्याने स्त्यायतेड्ँट् स्त्री सूतेः सप् प्रसवे पुमान् इति।[16] अत्र भाष्ये साङ्ख्यमतावष्टम्भव स्वकृतान्त इति कृत्वा साङ्ख्यशासनुसारित्वं व्याकरणस्येति सूचितवान् । अत्र संस्त्यानप्रसवशब्दाभ्यां तृतीयाऽवस्थापि लक्ष्यते संस्त्यानं तिरोभावः एतदेवाप चयशब्देनोच्यते। यद्यपि संस्त्यानं सङ्घः स्त्यायते शुक्रशोणिते यस्यामितिव्युत्पत्त्या लोकेऽपि स्त्रीशब्दो ड्रट्प्रत्ययान्त एतस्यैवार्थस्य प्रतिपादकस्तथापि स्त्रीत्वस्य खट्वादिसाधारणोपपत्तये तिरोभाव परत्वमेव तस्य स्वीकृतम्। एवं सूतेः सवित्यनेन सूधातोरोणादिको म्सुन्प्रत्ययः तस्य 'प' इत्यादेशो हस्वत्वेत्येवं रीत्या 'पुम्स् व्युत्पादितः। सूतेऽपन्यं जनयतीत्यनेन यद्यपि प्राणिनि पुरूषे एव 'पुम्स्' शब्दस्य शक्तिर्लभ्यते तथापि तस्य वृक्षादिसासारण्योपपत्तये प्रवृत्तिः आविर्भावरूपा पुमानित्यनेनोच्यते। एवं यदा निरोभावो न प्रवृत्तिः किन्तु साम्यावस्था सैव स्थितिर्नपुंसकशब्देनोच्यते। संस्त्यानं ततः पुनः शङ्कितं भाष्ये कस्य पुनः संस्त्यानं स्त्री, प्रवृत्तिर्वा पुमानिति-गुणानाम्। सत्वादीनामाविर्भावादिरूपः प्रवृत्तिशब्दवाच्यो नित्यः परिणाम इति कैयटः।

अयमिति व्यवहारविषयत्वं पुंस्त्वम् इयमिति व्यवहारविषयत्वं स्त्रीत्वम्, इदमिति व्यवहारविषयत्वं क्लीबत्वमिति विलक्षणं शास्त्रीयं स्त्रीपुंनपुंसकत्वम् । अतः शब्दोऽयं पुल्लिंगः स्त्रीलिंगो नंपुसकलिंग इत्यादिव्यवहारोऽपि संगच्छते। पक्षेऽस्मिन् "तस्माच्छसो नः पुंसि" स्वमोर्नपुंसकात्" इत्यादिशास्त्राण्यपि प्रमाणम्। नन्वेवं कथमेकस्मिन्नेव तटादिशब्देऽनेकलिङ्गत्वव्यवहारः इति चेन्न, तमेव सत्वादिगुणा नामुपचयापचयरूपविरूद्धधर्माधिकरणतया तटादिशब्दानां वस्तुतः पारस्परं भेदेऽपि समानानुपूर्वीकत्वेनाभेदारोपतयैवानेकलिङ्गत्वव्यवहारात्। यद्यपि -

स्तनकेशवती नारी लोमशः पुरुषः स्मृतः।
एतयोरन्तरं यच्च तदभावे नपुंसकम्।[17] इति।

इत्यादि "स्त्रियाम" इति सूत्रे महाभाष्ये लिङ्गस्यार्थनिष्ठत्वमेव प्रतिपादितन्तथापि न तदत्राश्रयितुं शक्यम्।

दारानित्यादौशस्प्रकृत्यर्थे तादृशलिंगाभावेन नत्वाद्यनापत्तेः। नदीपर्वतादि बचेतनपदार्थेषु लौकिकलिंगसम्भानाभावेन तेषु लिङ्गस्याव्यवस्थापत्तेश्च । अत एव भाष्ये "एकार्थशब्दान्यत्वाद् दृष्टं लिंगान्यत्वम्" "अवयवान्यत्वाच्च" इत्युक्तम्। अत एव एकस्मिन्नर्थे पुष्यस्तारकानक्षत्रम् इति नानालिंगदर्शनात्। कुटी कुटीरे यत्रावयवस्य रेफस्योपजनेऽपि लिंगभेददर्शनाच्च, शब्दनिष्ठं लिंगमन्यदेव। तस्यैव

व्यवहारौपयिकत्वं नियामकत्वाद्। अर्थनिष्ठस्य तस्य नियामकत्वे तु स्त्रीव्यक्तिः वस्तुपदार्थाभ्यां पुरूषश्च व्यक्त्यादिपदैर्न व्यवहियेत। तथा खट्वादौ स्तनकेशादिरुपलौकिकलिङ्गस्यासम्भवात्तवाचकात् स्त्रीप्रत्ययाद्यनापत्तिश्च स्यात्।

नन्वेवं भवदुक्तपुंस्त्वादिलिङ्गस्य शब्दनिष्ठस्य व्यवहारौपयिकत्वे "पशुना यजेत इति वाक्यबोधितो पशुकरणकयागः स्त्रीपशुनाऽपि प्राप्नोति। व्यक्त्यादिशब्दोक्तलिङ्गवत् स्त्रीपुंसादिसाधारण्येनार्थपरिच्छेदकत्वात् इति चेन्न । शब्दनिष्ठस्य शास्त्रीयलिंगस्यापि, अर्थपरिच्छेदकत्वात्। निश्चायकत्वादित्यर्थः। इति न स्त्रीपशुनाऽदृष्टासिद्धिः। पश्वादिशब्दोक्तलिंगस्य हि व्यक्त्यादिशब्दोक्त लिङ्गस्येव साधारण्याभावात्।

व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गतया साधारण्ये सम्भवेऽपि पशुशब्दस्य नित्यपुंलिङ्गत्वे मानाभावात्। वस्तुतस्तु उप्रत्ययान्तानां पुंस्त्वं व्याकरणेनैव निर्णीतम्। नन्वैवं पश्वा नतायुम् गुहा चरन्तम्" इत्यत्र कुतो नाभावाभाव इति वाच्यम, वेदभाष्ये "जसादिषु छन्दसि वा वचनम्" इति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वस्यैवावधारितत्वात्। न चैवं कुतो न छाग्याऽदृष्टसिद्धिरित्यपि शङ्क्यम्, छागो वा मन्त्रवर्णादिति न्यायेनैव निर्णयात्। मन्त्रवर्णे "छागस्य वयाया मेदसः" इति श्रूयते, इति छागस्येति च्छाग्यामसम्भावितमिति पुंस्त्वनिर्णय इति भूषणे सविस्तरं प्रपञ्चितम् ।प्रपञ्चश्च लौकिकलिंगमेव नामार्थः । तच्चावयवविशेषसंस्थानरूपम्। दारानित्यादौ तु पुंस्त्वारोपेणैव तत्प्रयुक्तकार्यम्। वस्तुतस्तु सति सम्भवे समानाधिकरण्यसम्बन्धेन लौकिकपुंस्त्वविशिष्ट शास्त्रीयलिंग एव पुंमादिशब्दानां शक्तिर्न केवलशास्त्रीये नापि केवल लौकिके, असम्भवे तु शास्त्रीय एव । अत एव "पशुना यजेत" इत्यादौ पशुस्त्रिया कृते यागे वैगुण्यम्।

चतुष्कम्- चतुष्कमिति जातिव्यक्तिलिङ्गसंख्याश्चेत्यर्थः। विभक्तीनां द्योतकत्वात् संख्यापि नामार्थः । अत एव "आदिञ्ञिटुडवः" इतिसूत्रे आदिरिति बहुत्त्वे एकवचनम्। वाच्यत्वेऽन्वयव्यतिरेकाभ्यां जसं विना नामार्थ बहुत्व प्रतीत्यभावापत्तेः । वैयाकरणमते संख्यापि प्रकृतेरर्थः एकवचनादिकञ्चैकत्वाद्यर्थे तात्पर्यग्राहकमेव। धातुप्रत्यय प्रत्ययान्तभिन्नार्थवच्छस्वरूपत्वरूपप्रातिपदिकत्वस्यानुगतस्य शक्ततावच्छेदकतया नानाशक्ततावच्छेदकत्वकल्पनं, न वा शक्त्यानन्त्यम्। न चान्वयव्यतिरेकाभ्यां विभक्तीनामेव वाचकत्वमस्त्विति वाच्यम्, 'दधि' 'मधु' इत्यादौ विभक्तेरभावेऽपि संख्याविषयकप्रतीतिसत्वेन व्यतिरेकव्यभिचारात्।

न चैवमपि एकप्रकृत्युपस्थाप्ययोरर्थयोः परस्परमन्वये आकाङ्क्षाविरहात् घटादावेकत्वाद्यनुपपत्तिः। अन्यथा हादिपदादुपस्थितयोरश्वसूर्ययोराधाराधेयभा वेनान्वययापत्तिः घटादिपदस्य एकत्वादिविशिष्टघटादौ च न शक्तिसम्भवः घटरूपं पश्य संख्यानवच्छिन्नघटादेरन्वयबोधादिति वाच्यम्, आकाङ्क्षावैचित्र्यादेकप्रकृ त्युपस्थाप्ययोरपि घटैकत्वयोः परस्परमन्वयसम्भवात्। अत एव खण्डशक्त्यैव काराद्युपस्थाप्ययोरन्वयोगव्यवच्छेदाद्योः परस्परमन्वयबोधः ।

नैयायिकानां मते अनन्तानां प्रकृत्यानुपूर्वीणां शक्ततावच्छेदकत्वापेक्षया अल्पतरविभ-क्त्याद्यानुपूर्वीणामेवऽत्वादिशक्ततावच्छेदकत्वस्यैवोचितत्वेन संख्यापि विभक्तेरेवार्थः।

शक्तता च सुत्वौत्वजस्त्वादिना न तु स्वादितिबादिसाधारणैकवचनत्वादिना, एकवचनत्वादेर्दुर्वचत्वात्। प्रातिपदिकत्वस्य दुर्वचत्वात् तदज्ञानेऽपि एकत्वादिज्ञानस्यानुभविकत्वादित्याहुः । वस्तुतस्तु न वा प्रकृतिः संख्यावाचिका न वा विभक्तिः, प्रत्युत विभक्त्यतसमुदायः "घट" इति संख्यावच्छिन्नघटस्य वाचकः इति सिद्धान्तः।

ननु टाबादिप्रत्यय समभिव्याहार एव, अजादिपदेभ्यः स्त्रीत्वस्य बोधात् सदभावे चाबोधात्, लिङ्गादित्रिकस्य प्रत्ययार्थत्वमेव सिद्ध्यति, न तु प्रक पथत्वम्। प्रत्ययादेव लिङ्गादीनामुपस्थितौ तेषां प्रकृत्यर्थे मानाभावादिति चेन्न। पाच पश्य' इत्यादिषु प्रत्ययमजानतोऽपि पुरूषस्य बोधादर्शनात्। प्रकृतेरेव वाचकत्वं युक्तम्। लिङ्गानुशासनस्यापि प्रकृतेरेव दर्शनात्। अत एवैषु पक्षेषु न निर्बन्धः । अत एव हरिणोक्तम् -

वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः।
स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः॥[19] इति।

शक्ततावच्छेदकत्वं तु तत्तदानुपूर्वीणामिति न कश्चिद्दोषलेशः। ननु सर्वमतेऽपि संख्यायाः तथा न आदितो द्विकं आदितस्त्रिकं, आदितश्चतुष्कं संख्यातिरिक्तं चतुष्कं, आदितः पञ्चकं च प्रातिपदिकार्थ इति पञ्च पक्षाः ।

तत्र कस्मिन् पक्षेऽनभिहितसूत्रमावश्यकं कस्मिंश्च व्यर्थमिति भाष्यानुसारेणोच्यते। आदितश्चतुष्कमिति पक्षे कारकमात्रं विभक्त्यर्थः। संख्यातिरिक्तं चतुष्कमिति पक्षे संख्यामात्रं विभक्त्यर्थः।

पञ्चकम्- पञ्चकं प्रातिपदिकार्थ इत्यस्य कारकसहितं चतुष्कमित्यर्थः । नन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तदवाच्यम् तत एव लिङ्गादीनामुपस्थितौ प्रतिवाच्यत्वे मानाभावाच्चेति चेत्सत्यम्, प्रत्ययवर्जिते “दधि पश्य” इत्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते, लिङगानुशासनस्य प्रकृतेरेव दर्शनाच्च। एकं द्विकं त्रिकं चतुष्कं पञ्चकं प्रातिपदिकार्थ इति पञ्च पक्षाः शास्त्रे तत्र तत्र भाष्याद्याकरग्रन्थेषु च निरूपिताः सन्ति। तत्र एकं प्रातिपदिकार्थ इति पक्षो मीमांसकमूतसम्मतत्वेन निरालम्बनाया जातेः प्रतीत्यनुभवासंभवदक्तिकत्वेन चेहोपेक्षितः। तथा आदितः द्विकं त्रिकं चतुष्कं चेति पक्षत्रये कारकं विभक्त्यर्थो भवति। तत्र स्वौजस् 'कर्मणि द्वितीया[20], द्वयोकयोतिर्वचनैकवचने[21] इत्यादीनामेकवाक्यता। सा चेत्थम्-स्वौजस् इत्यत्र पदद्वयं प्रातिपदिकात् अम् इति च। कर्मणि इत्यत्र च पदद्वय-कर्मणि, द्वितीया इति च। तथा द्वयेकयोरित्यत्रापि पदद्वयं-द्वयेरकयोः द्विवचनैकवचने इति च एवञ्चषट् पदानि जायन्ते।

तत्र प्रायो व्याकरणशास्त्रे कारकपञ्चम्यसम्भवेन दिग्योगलक्षणपञ्चमी बोध्या। पञ्चम्यर्थेऽन्वयः। प्रातिपदिकावधिपरत्ववान् अम् प्रत्ययो भवतीत्यर्थः। कर्मणीति सप्तम्यन्तस्य निष्ठत्वसम्बन्धेन द्वयेकयोरित्यत्रान्वयः। कर्मगते द्वित्वे एकत्वं चेति। द्वयेकयोरित्यस्य च वाचकत्वसम्बन्धेन अम् प्रत्ययेऽन्वयः । एकत्ववाचकोऽम् भवतीति द्वितीया, द्विवचनैकवचने इत्यनयोस्त्वभेदसम्बन्धेनाम्येवान्वयः। द्वितीयैकवचना भिन्नोऽमित्यर्थः । एतत्सर्व प्राधान्येन सरूपसूत्रे अनभिहितसूत्रे च भाष्ये प्रतिपादितम्।

विशेषणतया शब्दोऽपि शाब्दबोधे भासते। युधिष्ठिर आसीदित्यादौ युधिष्ठिरशब्दवाच्यः कश्चिद् आसीदिति बोधात्।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्व शब्देन भासते ॥[22] इति हर्युक्तेः

यत्र प्रत्यक्षज्ञानं तत्रापि शब्दार्थयोस्तादात्म्यादारोपितं शब्दभानमत्येवेति सूचयितुमनुविद्धमिवेतीवशब्दः प्रयुक्तः। प्रत्यक्षादिरूपसकलज्ञाने शब्दभानं शब्दार्थ योस्तादात्म्यादुपपद्यत इति यावत्। शब्दार्थयोस्तादात्म्यं च अर्थ शृणोति अर्थं वदति इत्यादिप्रयोगानुसारेणानुभवसिद्धत्वादुपनीयम्। न ह्यर्थस्य कम्बुग्रीवादिमतः श्रवणं वदनं वा संभवति। अतोऽर्थ शृणोतीत्यर्थ बोधात्तादृशप्रयोगोपपत्तिः। एवञ्चार्थ श्रवणोच्चारणानुपपत्त्या शब्दार्थयोस्तादात्म्यमनिच्छताऽप्यङ्गीकार्यम्।

अत एव ओमित्येकाक्षरं ब्रह्म, रामेति द्वयक्षरं नाम मानभङ्गः पिनाकिनः, वृद्धिरादैच् इत्येवमादौ शक्तिग्राहकश्रुतिस्मृतिविषये सामान्याधिकरण्येन प्रयोगश्च सङ्गच्छते।

न च शब्दार्थयोस्तादाम्येऽग्निशब्दोच्चारणे मुखे दाहापत्तिरिति वाच्यं तादात्म्यस्य तभिन्नत्वे सति तदभेदेन प्रतीयमानत्वेन भेदाभेदघटितत्वान्निराकृत त्वात। शब्दार्थयोर्भेद एव वास्तवोऽभेदस्त्वारोपितः। वास्तवभेदादेव नाग्निशब्दा च्चारणेन दाहापत्तिसंभवः। नापि आरोपिताभेदात्तत्संभवः। न ह्यारोपिताग्नित्ववि शिष्टादग्निकार्य दाहादिलोके दृश्यते। तोऽर्थ शब्दयोस्तादात्म्याङगीकारेऽपि न निरुक्तदोषापत्तिरिति भावः, शब्दस्य नामार्थत्वं कथमिति जिज्ञासायामुच्यते "जबगडदशमुच्चारय” इत्यादावर्थोच्चारणसंभवेन विना शाब्दविषयं विना शाब्दबो धासंगतिश्चेति सोऽपि प्रातिपदिकार्थः। यद्यत्र विष्णुपदात् स्वार्थद्रव्यलिङ्गाद्यर्थवद् विष्णु शब्दस्याप्युपपत्तिर्न स्यात्तर्हि अर्थोच्चारणासंभवेन विष्णुमुच्चारयेति वाक्यार्थ बोधानुपपत्तिः स्यात्। अतः शब्दार्थवत्स्ववाचकशब्दस्याप्युपपत्तिर्भवति। उपस्थि तिश्चोच्चारित समानानुपूर्वकस्यैव शब्दस्य न नारायणादेः पर्यायस्य। तथा च विष्णु शब्दस्योपस्थितौ सत्यां तत्र वाचकतासंबन्धेन पञ्चकार्थस्यान्वयाच्चतुर्भुजरूपार्थ वाचकं विष्णुशब्दमुच्चारयेत्यर्थबोधोदयात् शब्दोऽपि प्रातिपदिकार्थः ।

न च लक्षणया निर्वाहः। यतो हि स्वशक्यसम्बन्धरूपया लक्षणया यथा-स्वं–विष्णुशब्दः, स्वशक्य-लक्ष्मीपतिरूपोऽर्थः, तत्सम्बन्धो वाच्यतया विष्णुशब्दे इति स्ववाच्यवाचकत्वसम्बन्धेन लक्षणया वाक्यार्थ बोधनिर्वाह इति चेन्न । तावताऽपि शब्दस्य प्रातिपदिकार्थत्वासिद्धेः किं च द्विविधा हि लक्षणा प्रयोजनवती निरुढा चेति। प्रयोजनवती चेत् यथा 'गंगायां घोष' इत्यत्र घोषे शैत्यपावनत्वप्रतीतिः प्रयोजनं तद्वदत्र लक्षणायाः प्रयोजनं वक्तव्यं स्यात्। निरुढालक्षणाया शक्त्यतिरिक्तत्वाभावात्। यथाऽस्य शब्दस्यैतस्मिन्नर्थो शक्तिरित्यनादितात्पर्यग्रह वशाबुध्यते तथा निरूढलक्षणापि अनादितात्पर्यग्रहाधीना। अनादितात्पर्य च यथा विष्णुशब्दस्य लक्ष्मीपतौ प्रसिद्ध, तथा विष्णुशब्देऽपि। इति निरूढलक्षणाश्रवणं नाम शक्त्याश्रयणमेव। ज, ब, ग, ड, द, शमुच्चारय इत्यादौ शक्त्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च। अज्ञातातायाश्च वृत्तेरप्रयोगात्। 'गङ्गायां घोष' त्यत्र गङ्गापदस्य वस्तुतः सतोऽपि स्वशक्यप्रवाहसामीप्यसम्बन्धास्याज्ञाने लक्ष्यतीररूपार्थबोधजननेन ज्ञाताया एव वृत्तेस्थोपस्थितौ प्रयोजकत्वमित्य त्यावश्यकत्वात्प्रकृते लक्षणाया अग्रहान्न वाक्यार्थबोध उदेति। “गामुच्चारय" इत्यादिभाषाशब्दानामनुकरणे साधुतासम्प्रतिपत्तेस्तेषां शक्त्यभावेन परनये लक्षणाया असंभवाच्चेत्यभिप्रेत्य षोढाऽपि क्वचित्प्रातिपदिकार्थः। यतो हि गावेति भाषास्थः शब्दः कश्चिदनर्थकः । गावेतिभाषाशब्दानुकरणेऽपि तादृशानुकरणशब्दानां साधुत्वस्य सर्वैरप्यङ्गीकारादनुकरणानां क्वापि शक्तावसत्यां शक्याग्रहात् शक्यसम्बन्ध रूपलक्षणाया अपि नैयायिकसंमताया अग्रहादर्थबोधो न स्यात्, वृत्यार्थबोध जनकत्वरूपार्थवत्त्वाभावेन प्रातिपदिक संज्ञापि न स्यात्, साधुत्वं चापि न स्यात् इति अनुकरणानां शब्दे शक्तिः स्वीकार्या अत आह -

शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा यथा।
नोचेच्छोत्रादिभिः सिद्धोऽप्यसावर्थो व भासते॥[23] इति।

यद्यपि अनुकार्यानुकरणयोर्भेदविवक्षाः तदा शब्दोऽपि प्रातिपदिकार्थो यदि न भेदविवक्षा तदा श्रोत्रादिभिरूपस्थितोऽप्यर्थवद् भासते। अनुकरणत्वञ्च स्वसदृशशब्दमात्रबोधतात्पर्यकोच्चारणविषयत्वम्। अनुकार्यत्वञ्च स्वसदृशशब्दप्रति पाद्यत्वे सति शब्दत्वम्। तत्रानुकार्यदनुकरणं भिद्यते इति तयोर्भेद विवक्षायामनुकार्यस्वरूपप्रतिपादकत्वेनार्थत्वात् प्रातिपदिकत्वात् स्वादिविधिः। भेदप क्षज्ञापकः "भुवो वुग्लुङ्लिटोः” इत्यादि निर्देशः। अयञ्च पक्षः “मतौ छः सूक्तसाम्नोः” (५/२/५८) इति सूत्रे भाष्ये विस्तृतः। तथाहि “अस्य वामीयम्" इत्यत्र छसिद्धयर्थम् अस्य वामशब्दस्यानुकरणत्वसमर्थनाय "सिद्धं तु प्रातिपदिकविज्ञानात्” इत्युक्त्वा एवं योऽसावाम्नायेऽस्य वामशब्दः पठ्यते सोऽस्य पदार्थः। किम्पुनरन्ये आम्नायशब्दा अन्ये इमे? ओमित्याह “इत्युक्तेरनुका र्यशब्दस्वरूपनिरूपितायाः शक्तेरनुकरणे सत्वात् वृत्यर्थविषयकबोधजनकत्वरूपार्थ वत्वेन प्रातिपदिकत्वात् स्वादयो जायन्ते। तादृशार्थवत्वस्यैवार्थवत्सूत्रे स्वीकारात्। अत एव “भुवो वुग्लुलिटोः” अत्र भुव इति निर्देशः संङ्गच्छते, अन्यथा भुवो धातुत्वात् प्रातिपदिकत्वाभावे निर्देशासंगतिः स्पष्टैव। अभेदपक्षज्ञापकन्तु “भू सत्तायाम्” इत्यादि निर्देशः।

प्रातिपदिकत्वपदत्वाभावेऽपि 'भू' इत्यादिसाधुः भवत्येव। अयं पक्षः "लुक 'इति सत्रे भाष्ये स्पष्टः। तत्र हि-प्रकृतवदनुकरणं भवति किम्प्रयोजनम्? द्विः पचन्त्वित्याह "तिङतिङ” इति निघातो यथा स्यात्। अग्नी इत्याह "इद्‌देद्द्विवचनं प्रगृह्यसंज्ञं भवति इति प्रगृह्यसंज्ञा यथा स्यात् "इति भाष्यात् अनुकरणमनुकार्यादभिन्नम् इति च लभ्यते। उक्तञ्च -

अत एव गवित्याह भू सत्तायामितीदृशम्।
न प्रातिपदिकं नापि पदं साधु तु तत् स्मृतम्॥[24] इति।

ननु अपदं न प्रयुञ्जीत इति भाष्यादसाधु इदमिति चेन्न। पदमित्यस्य हि अपरिनिष्ठितत्वमित्यर्थः।

परिनिष्ठितत्वञ्च-अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्त्वम्।[25] देवदत्तो भव तीत्यादौ “तिङतिङ” इति निघाते जातेऽतिङन्तपदपरतिङन्तत्वरूपोद्देश् यतावच्छेदकसत्वे अपरिनिष्ठितत्ववारणाय अप्रवृत्तेति। ‘स्वरति' इत्यादिविकल्प सूत्रस्य

पाक्षिकप्रवृत्तौ "सेद्धा" इत्यादावसाधुत्ववारणाय नित्यविधीति। अभेदपक्षे तु "अर्थवत्" इति सूत्रस्यार्थवत्वरूपपोद्देश्यतावच्छेदकानाक्रान्तत्वात् सूत्राप्रवृत्तावपि भू इत्यादिपरिनिष्ठितम्। परिनिष्ठितसाधुशब्दौ पर्यायौ।

नन्वनुकरणस्यानुकार्यस्वरुपबोधकत्वस्याभावेन कथमनुकार्यस्वरुपप्रती तिरिति चेत् सादृश्याख्यसम्बन्धेनेति गृहाण। यथा मैत्रसदृशपिण्डदर्शने मैत्रस्मरणम्। एव "भू" इत्याद्यनुकरणज्ञाने तादृशानुकार्यस्य ज्ञानमिति नागेशा भूषणकारास्तु- अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात्तत्सिद्धये शक्ति रुपेया। शब्दार्थयोरभेदे प्रत्यक्षे विषयस्य हेतुत्वात् स्व प्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति। यद्यतिप्रसङ्गवारणाय वृत्ति जन्यपदोपस्थितिरेवहेतुस्तथाप्यत्राऽऽश्रयतया वृत्तिमत्वस्य सत्वान्नानुपपत्तिः। निरूप कताश्रयतान्यतरसम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यत इत्यनवद्यम सम्बन्धस्योभयनिरुप्यत्वात्पदादर्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसंभवाच्चेति।

अयं भावः –सम्बन्धस्य सम्बन्धिनौ द्वौ, तौ च सम्बन्धः निरूपकौ, सम्बन्धश्च सम्बन्धिद्वयनिरूप्यः, अतः सम्बन्धिभ्यां भिन्नो द्विष्ठश्च सम्बन्ध इत्युच्यते। घटशब्दतदर्थयोर्यः सम्बन्ध तस्य निरुपकौ सम्बन्धिनौ घटशब्दस्तदर्थश्चेति द्वौ। सम्बन्धस्य सर्वत्रोभयनिरुप्यत्वमेव लोके प्रसिद्धं, न क्वाप्येकनिरूप्यत्वं दृश्यते।

शब्दार्थयोस्तादृशसम्बन्धश्च बोध्यबोधकभावरूपः। एतेनासौ सम्बन्ध एव शक्तिरिति सूचितम्। तत्र बोधकतारूपाशक्तिः शब्दनिष्ठा, बोध्यतारूपा तु शब्दार्थनिष्ठा। तथा च शब्दतदर्थौ द्वावपि वृत्त्याश्रयौ। एवं च बोध्यतारूपवृत्त्याश्रयत्वाद्यथा शब्दार्थस्य शाब्दे भानं जायते। तद्वद्बोधक तारूपवृत्त्याऽऽश्रयत्वाद्यथा शब्दार्थस्य शब्दे भानं जायते तद्वद्बोधकता रूपत्त्याश्रयत्वात् शब्दस्यापि शाब्दबोधे भानं संभवेत। अनया रीत्या सर्वत्रैव शाब्दे शब्दभानमुपपादनीयम्। उक्तञ्च वाक्यपदीये -

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते॥ इति।
विषयत्वमनादृत्य शब्दैर्नाऽर्थः प्रकाश्यते॥[26] इति।

घटादिद्रव्यस्य चाक्षुषप्रत्यक्ष दीपाद्यालोकसंयोगोहेतुरिति निर्विवादम्। अन्यथाऽन्धकारेऽपि घटादिचाक्षुषप्रत्यक्षस्याप्यापत्तेः। तथा च घटदीपाद्यालोक संयोग एव घटस्येव स्वरूपमपि प्रत्यक्षं जनयति? विषयसंनिधाने सति दीपादितेजसि शक्तिद्वयस्य लोके प्रत्यक्षसिद्धत्वात्। एवमर्थगोचरशब्दनिष्ठश क्तिसहकृत एव शब्दोऽर्थस्य स्वस्वरूपस्य च प्रत्यक्षं जनयति। यथा च विषयसंनिधाने तु स एवालोकसंयोगः केवलं स्वस्यैव प्रत्यक्षं जनयति, न घटादेः। तथाऽर्थे तात्पर्यभावे शब्दे च तात्पर्ये सति स एव शब्दः स्वनिष्ठता दृशावृत्यैव स्वस्यैव प्रत्यक्षं जनयतीति स्वं रूपमिति सूत्र भाष्यादपि एतदेवावगम्यते।

**मीमांसकाभिमतनामार्थ निरुपणम्** - नागेशभट्टः परमलघुमञ्जूषायां नामार्थविषये प्रथमं मीमांसकमुपस्थापय त्राह-अत्र मीमांसकाः शब्दाना जातौ शक्तिलाघवात्। व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात्। नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते इति न्यायस्य विशेषणे शक्तिर्नविशेष्ये लक्षणेति तात्पर्यात्। अत्र जातिपदमुपलक्षणम्, तेन आकाशत्वाभावत्वादीनां जातित्वाभावेऽपि न क्षतिः। जाते मार्थत्वे "जात्या ख्यायामकस्मिन् बहुवचनमन्यतरस्याम्' इति पाणिनिसूत्रम्, "सवर्णेऽण् ग्रहणमपरिभाष्यम् आकृतिग्रहणात् सिद्धम् इति वार्तिकम् "आकृति वाजप्यायनः" इति सरूपसूत्रस्थं भाष्यञ्च मानमस्ति। वृद्धव्यवहारेण प्रथमं व्यक्तौ शक्तिज्ञानेऽपि आनन्त्यात् तावतीषु शक्तिग्रहासम्भवात् तदाश्रयभेदभि बनानाशक्तिकल्पने गौरवात् पश्चाज्जातावेदं निर्धार्यत इति तेषामाशयः। एकव्यक्तिविषयकशक्तिज्ञानादपरव्यक्तिविषयकशाब्दबोधाभ्युपगमे तु गोव्यक्ति विषयकशक्तिज्ञानादर वविषयकबोधापत्त्या तद्व्यक्तिविषयकज्ञानस्य तद्व्यक्ति विषयकवोध हेतुताया अवश्यककल्प्यतयैकविषयकज्ञानादपरव्यक्तिबोधानुदयापत्त्या सकलव्यक्ति भानार्थः तावद् व्यक्तिषु शक्तिकल्पनायां गौरवस्य स्फुटतया जातादेव शक्ति कल्पनोचिता। न च जातिव्यक्तिवादेऽपि गोत्वस्य शक्यत्वे

तान्निष्ठशक्यतावच्छेदकं गोत्वं वाच्यम्। गोत्वञ्च 'गवेतरासमवेतत्वे सति सकलगोसमवेतत्वरूपम्। एवञ्च तस्य व्यक्त्याद्यनेकपदार्थघटिततया अतिगौ स्वमिति वाच्यम्, जातेः शक्यत्वे शक्तिनिरूपिकायाः जातैरैक्येन शक्तेरेकत्वम्।

तादात्म्येन गोत्वरूपाया जातरेव शक्यतावच्छेदकत्वात, शब्दार्थयोस्तादा त्म्याङ्गीकारे शब्दगतजातेर्गोत्वस्याखण्ड धर्मरूपत्वस्वीकारेण तस्यैव गौरवाभावाच्च। किञ्च जातेः शवयत्वे शक्तिनिरूपिकायाः जातैरैक्येन शक्तेरेकत्वम्।

"नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते" इति न्यायेनापि विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वेनोपजीव्यत्वाद् विशेषणीभूतजातावेव शक्तिरुचिता, व्यक्तौ लक्षणेति तात्पर्यम् जातिपदेनात्र तत्तत्पदार्थगतासाधारणो धर्मो विवक्षितः, न तु नित्यत्वे सति एकत्वे सति तत्पदार्थवृत्तित्वम्। तेनाकाशत्वाभा वत्वादीनामनेकसमवेतत्वरूपजातित्वा भावेऽपि नातिव्याप्तिः तत्तत्पदार्थगता साधारणधर्मस्यैव शास्त्रेणार्थशब्देन व्यवहारः । किञ्च एकस्यां व्यक्तौ शक्त्युपदेशे व्यक्त्यन्तरे तद्भावेन तद्बोधप्रसङ्गात। अर्थात् यत्किञ्चिदेकव्यक्ति निरूपितशक्तौ स्वीकृतायामपि व्यक्त्यन्तरस्य शाब्दबोधविषयोपयत्तये व्यक्तिश क्तिवादेऽपि लक्षणाया अवश्यस्वीकर्तृकत्वात्। नन्वेवमुभयत्रापि लक्षणास्वीका रसाम्येऽपि किमिति व्यक्तौ शक्तिर्न स्वीक्रियते इति चेन्न, जातिव्यक्तिवादे व्यक्त्यन्तरवोधाय स्वसमवेताश्रयत्वरुपः शक्यसम्बन्धः इति व्यक्तिशक्तिवादे लक्षणास्वरूपे गौरवात् व्यक्तौ शक्तेरस्वीकारात्। शक्त्युपदेशाभावेन व्यक्त्यन्त रवोधाप्रसंगात्। मीमांसकमतेन गामानयेत्यादावन्वयानुपपत्त्या तदाश्रयलक्षकत्वेन निर्वाह इति व्यक्तौ शक्तिकल्पनं निष्फलम्। ननु सर्वत्रैव गोपदाज्जातिव्यक्त्युभयविषयकसर्वसम्मतवोधोपपत्तये युगपवृत्तिद्वयङ्गीकार्य, तच्च न युक्तम् युगपवृत्तिद्वयविरोधात् इति चेन्न 'गङ्गायां मीनघोषौ स्तः" इति वाक्यात् प्रवाहे मीनस्य तटे घोषस्य चान्वयवोधस्य सर्वसम्मतत्वेन युगपदवृत्तिद्वयविरोधे मानाभावात्। शक्तिः तात्पर्यविषये लक्षणा च युगपन्नेत्येतत्तात्पर्यस्यैव तनयायविषयत्वाच्च प्रकृते तात्पर्यविषये एव लक्षणा इति न तन्न्यायविरोध इति मीमांसकाभिप्रायः ।

**नामार्थ-विचारसारः** - नामार्थप्रकरणे नामपदस्य कोऽभिप्रायः ?कतिविधं नाम? के नामार्थाः? केषां मते कस्य नामार्थस्य मुख्यत्वम्? इत्यादिका विषया विवेचिताः सन्ति। नामशब्दः प्रतिपादिकापरपर्यायो वर्तते। वैयाकरणसिद्धान्तकौमुद्यां प्रातिपादिकमिति एका संज्ञा तद्बोधकं सूत्रद्वयम्- "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" "कृत्तद्धितसमासाश्चेति" |प्रथमेन सूत्रेण धातु-प्रत्यय-प्रत्ययान्तंभिन्नार्थवच्छब्द स्वरूपं प्रातिपादिकसंज्ञकं भवति, द्वितीयेन सूत्रेण कृत्प्रत्ययान्तस्य तद्धितप्रत्ययान्तस्य, समासस्य च प्रातिपादिकसंज्ञा विधीयते। सिद्धान्तकौमुद्याः कारकप्रकरणे "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इत्यस्मिन् सूत्रे प्रातिपदिकार्थो वदता भट्टोजिदीक्षितेनोक्तो नियतोपस्थितिकः प्रातिपदिकार्थः । नियता उपस्थितिर्यस्य असौ नियतोपस्थितिकः। सः एव प्रातिपदिकार्थः अस्यैव सूत्रस्य लघुशब्देन्दुशेखरे श्रीमता नागेशभट्टेन प्रोक्तं यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन भानं स प्रातिपदिकार्थः। यथा-राम' इति प्रातिपादिकस्य उच्चरिते सति दशरथापत्यार्थस्य बुद्धौ नियमेन भानं भवति। अतः दशरथापत्यरूपः अर्थः राम इति प्रातिपदिकस्य अर्थः। बालमनोरमादिटीकासु अन्य एव प्रकारः प्रोक्तो वर्तते। तथा हि प्रवृत्तिनिमितं, व्यक्तिः, लिङ्गम्, संख्या, कारकम् इति पञ्चकं प्रातिपदिकार्थः। एतदेवादाय वैयाकरणभूषणसारनामके ग्रन्थे नामार्थप्रकरणे प्रोक्तं कौण्डभट्टेन -

एक द्विकं, त्रिकं, चाऽथ, चतुष्कं, पञ्चकं तथा।
नामाऽर्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः॥[27] इति

अनया कारिकया नामार्थविषये शास्त्रेषु अनेके पक्षाः प्रस्तुताः दरीदृश्यन्ते। तथा हि 'एकम्' इति पदेन प्रवृत्तिनिमित्तं जात्यपरपर्याय, द्विकं प्रवृत्तिनिमित्तं व्यक्तिश्चेति गोसमहः। लिङ्गसहितं त्रिकं, संख्यासहितं चतुष्कं, कारकसहितं पञ्चकमिति पञ्चविधं
प्रातिपदिकार्थः दृश्यते। भूषणकारः कौण्डभट्टस्तु शब्दमपि एकमन्यं प्रातिपदिकार्थं स्वीकरोति। शब्दस्तावच्छाब्दवोधे भाषते अतः शब्दोऽपि प्रातिपदिकार्थः। यथा जबगडदशमुच्चारय विष्णुमुच्चारयेत्यादावर्थोच्चारणसम्भवादानुपूर्विशब्दस्वरूपमेव प्रातिपदिकार्थः । स्वस्य मतस्य परिपुष्टये भर्तृहरेः कारिकामपि प्रस्तौति कौण्डभट्टः -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।[28]

अत्र मीमांसका केवलं प्रवृत्तिनिमित्तमेव प्रातिपदिकार्थत्वेन स्वीकुर्वन्ति लाघवात्। तेषां नये व्यक्तौ शक्तिस्वीकारे गौरवम्। परञ्च वैयाकरणाः लोकव्यवहारस्य प्राबल्यं व्याहरन्तः लोके च गामनय' इत्यादि वाक्यश्रवणानन्तरं गोव्यक्तेरेव आनयनदर्शनाद् व्यक्तेः एव प्रामुख्यं वदन्ति। यद्यपि भगवता पाणिनिना उभयमपि स्वीकृतम्। जातौ प्रमाणं "जात्याख्यायामेकस्मिन्बबहुवचनमन्यतरस्याम्" इति सूत्रम्। व्यक्तौ च "सरूपाणामेकशेष एकविभक्तौ' इति सूत्रम्। भगवता भाष्यकारेण पतञ्जलिना सिद्धे शब्दार्थ सम्बन्धे" इति वार्तिकं व्याख्यता उभयं प्रोक्तम्। आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् इत्युच्यते। द्रव्यं पदार्थं मत्वा सरूपाणाम् इत्येकशेष आरभ्यते।

वैयाकरणाः व्यक्तिपक्षस्वीकारे शब्दानामानन्त्ये गौरवं परिहाराय एवं समादधते

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।

शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति।।[29] इति।।

लिङ्गमपि प्रातिपदिकार्थः। अत्र प्रमाणं वागादौ टाबादि प्रत्ययं विनाऽपि स्त्रीत्वबोधः। सङ्ख्याऽपि प्रातिपदिकार्थः। किञ्च कारकमपि प्रातिपदिकार्थः इत्यत्र प्रमाणं तु 'दधि मधु लिट्' इत्यादौ विभक्तिं विनाऽपि सङ्ख्याकारकयोर्बोधः ।

सन्दर्भ ग्रन्था

1. शब्दशक्तिप्रकाशिका - १५
2. शब्दशक्तिप्रकाशिका कारिका - १६
3. शब्दशक्तिप्रकाशिका कारिका - १७
4. महाभाष्ये पस्पशाहिके
5. शब्दशक्तिप्रकाशिका, कारिका - १६
6. वाक्यपदीयम्
7. शब्दशक्तिप्रकाशिका, कारिका - २४
8. शब्दशक्तिप्रकाशिका कारिका - २५
9. शब्दशक्तिप्रकाशिका, कारिका - २६
10. शब्दशक्तिप्रकाशिकायाम् उल्लिखितम्
11. शब्दशक्तिप्रकाशिका कारिका - २६
12. वै. भू, सार: नामार्थनिर्णये कारिका – २५
13. तन्त्र वा० १ पा० ३ अधि०
14. महाभाष्यम् परपशाह्निकम
15. पाणिनीयसूत्रम् १-२-४५
16. स्त्रियाम् (४-१-३) इति सूत्रे महाभाष्ये
17. महाभाष्ये स्त्रियाम् (४-१-३) सूत्रे
18. वाक्यपदीयकारिका - द्वितीयकाण्डम् - १६४

19. पाणिनीयसूत्रम २/३/२
20. पाणिनीयसूत्रम् १/४/२२
21. वाक्यपदीयम् ब्रह्मकाण्डम कारिका - १२३
22. वैयाकरणभूषणसार कारिका – २६
23. वैयाकरणभूषणसारः कारिका – २७